# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### प्रथमं प्रश्नपत्रम् - First Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. कयोश्चिद् द्वयोः श्लोकयोः भावार्थं स्वभाषया लिखत ।** **१०**

(१) न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।

(२) कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः।
हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः।।

(३) क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये वर्धति जाठरोऽग्निः।
आपत्सु वैराणि समुद्भवन्ति छिद्रेष्वनर्था बहुली भवन्ति।।

**प्र.२. अधोलिखितवाक्येषु केषाञ्चित् पञ्चानामुत्तरं संस्कृतभाषया लिखत ।** **५**

(१) हिमालयस्य शिखराणि सर्वदैव केन आच्छादितानि भवन्ति? (२) दमयन्ती कस्य राज्ञः पुत्री आसीत्? (३) कस्याः दुग्धं पथ्यं भवति? (४) अजिने उपविश्य ऋषयः किं कुर्वन्ति? (५) विश्वस्य पुरातनी भाषा कास्ति? (६) कस्य वृक्षस्य शिखरे पत्राणां गुच्छो भवति?

**प्र.३. (क) अधोलिखितेषु पञ्चानां वाक्यानां स्वभाषयाऽनुवादं कुरुत ।** **५**

(१) गङ्गायाः जलेन कृषीवलानां महोपकारो भवति। (२) भारतवर्षस्य मूर्ध्नि मुकुट इव शोभते हिमालयः। (३) सुप्रसिद्धः सुविशालश्च मानसं नाम सरोवरः अपि नगस्यास्यातितुङ्गे शिखरे वर्तते। (४) नारिकेलस्य सर्वाङ्गं मनुष्याणामुपयोगाय भवति। (५) अस्माकं संस्कृतिः केवलं संस्कृतेनैव ज्ञातुं शक्या।

**प्र.३. (ख) अधोलिखितेषु वाक्येषु अशुद्धि-संशोधनं कुरुत।** **५**

(१) साधवो न भवति धनस्याभीप्सवः। (२) घृताद् बहूनि मिष्ठान्नानि पक्वान्नानि प्रसाध्यन्ते।
(३) जनाः तीर्थस्थानेषु स्नानं करोति। (४) वयं बहुधा नारिकेलस्य पयः पिबथ।
(५) नाहं बन्धनमुपेत्य राजापि भवितुम्-इच्छन्ति।

**प्र.४. एतासु लोकोक्तिषु कासाञ्चित् पञ्चानां स्वभाषया भावार्थं लिखत ।** **५**

(१) अम्बुनो बिन्दुरल्पोऽपि शुक्तौ मुक्ताफलं भवेत्। (२) अपेयेषु तडागेषु बहुतरं जलं भवति।
(३) अर्थार्थं प्रवर्तते लोकः (४) अतिमात्रोपहासस्तु कलहाय प्रकल्पते।
(५) अन्तःपुरागतमापणे घुष्यते। (६) असिद्धं बहिरङ्गमन्तरङ्गे।

**प्र.५. (क) अधोलिखितेषु केषाञ्चित् पञ्चानां सविग्रहं समासनामानि लिखत ।** **५**

(१) विद्याप्रवीणः। (२) अब्राह्मणः। (३) शीतोष्णम्। (४) बाहुबलनिर्जितशत्रुः।
(५) रामकृष्णौ। (६) अनुविष्णु।

**(ख) ''सर्व (नपुंसकलिङ्गे)'' अथवा ''गो '' शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत। ५**

**प्र.६. अधोलिखितेषु केषाञ्चित् पञ्चानां शब्दानामर्थान् लिखत ।** **५**

(१) अभ्यागतः। (२) परिमार्गणम्। (३) धर्मनिरतः। (४) उपकरणम्। (५) सम्मानयोग्यः।
(६) जनकात्मजा।

**प्र.७. निम्नलिखित-वाक्येषु केषाञ्चित् पञ्चानां संस्कृतेऽनुवादं कुरुत ।** **५**

(१) राजा पृथ्वी की रक्षा करते हैं। (२) मैं गाय का दूध पीता हूँ। (३) आचार्य परिणाम घोषित करेंगे। (४) सज्जन किसी से ईर्ष्या नहीं करते। (५) उसे देखकर सभी प्रसन्न हो जाते हैं। (६) शत्रु को कभी भी निर्बल मत समझो।

(1) A king protects the earth. (2) I drink cow's milk. (3) The head master will announce the result.(4) Gentlemen do not envy anyone. (5) All feel happy on seeing him. (6) Never consider an enemy to be weak.

❑ ❑ ❑

4/2

A06-Green

F-2025

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### द्वितीयं प्रश्नपत्रम् - Second Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु द्वयोः श्लोकयोः भावार्थं स्वोत्तरभाषया लिखत ।** **१०**

(१) शक्यसे ता गिरः सम्यक् कर्तुं मयि नरेश्वर ।
यास्तेषां लोकपालानां सन्निधौ कविताः पुरा ।।

(२) भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा ।
श्यामा समविभवताङ्गी स्त्रीरत्नं रत्नभूषिता ।।

(३) वर्षा वसन्तं शरदं हिमान्तं शैत्यं निदाघं च दिनं च रात्रिम् ।
नक्षत्रचक्रं सुमनोहरं हि ससर्ज क्षेमाय नृणां विधाता ।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य स्वभाषया अर्थं लिखत ।** **१०**

ग्रामेषु सुखं शान्तिश्च वर्तते। तत्र भोजनं,पानं,स्नानं,व्यायामश्च सुलभाः सन्ति। न तत्र नगराणामिव दुग्ध-दधि-घृत-वस्त्र-इन्धन-शाकादिनामभावः,सर्वोऽपि सुखेन स्वकीये गृहे वसति। ग्रामे ग्रामीणाः कृषिं कुर्वन्ति। सर्वेषां ग्रामवासिनां स्वीयानि क्षेत्राणि भवन्ति। तानि नित्यं सस्यैः शोभितानि सन्ति। तेषु यव-गोधूम-तण्डुल-चणक-मुद्ग-माषादीनि धान्यानि उद्भवन्ति। ग्रामेषु उद्यानानि भवन्ति। तेषु आम्र-जम्बू-जम्बीर-नारङ्ग-पनसादीनि फलानि शाकानि च जायन्ते। अन्यानि च तत्र बहूनि ऋतुफलानि सन्ति। ज्येष्ठाषाढयोः प्रभूतानि आम्राणि भवन्ति।

अथवा

नरपतिः अब्रवीत्। आस्तां तावत् सर्वम् एवेदम्। अपनयतु नः कुतूहलम्। आवेदयतु भवान् कात्स्न्र्येन आत्मनः जन्म। कस्मिन् देशे भवान् कथं जातः ? केन वा नाम कृतम्? का माता ? कः ते पिता ? कथं वेदानाम् आगमः ? कथं शास्त्राणां परिचयः ? कुतः कलाः समासादिताः ? किं जन्मान्तरानुस्मरणम् उत वरप्रदानम् , अथवा विहगवेषधारी कश्चिच्छन्नं निवसति ? क्व वा पूर्वम् उषितम्? कियत् वा वयः ? कथं वा पञ्जरबन्धः ? कथं चाण्डालहस्तगमनम्? इह वा कथम् आगमनम् इति ?

**प्र.३. निम्नलिखितासु पञ्चानां लोकोक्तीनामर्थं स्वोत्तरभाषया लिखत ।** **५**

(१) अनुरागोऽनुरागेण परीक्षितव्य:। (२) अध्रुवाद् ध्रुवं वरम्। (३) अन्धो मुकुरं प्राप्य नोपकृतो भविष्यति। (४) अनुष्ठितस्यापराधस्यानभ्युपगमो द्विगुणीकरोत्यपराधम्। (५) अनुक्तमप्यूहति पण्डितो जन:। (६) अवकरे स्थितोऽपि वज्रमणिर्महामूल्य एव।

**प्र.४. अधोलिखितपदेषु पञ्चानामर्थं विलिख्य वाक्येषु प्रयोगं कुरुत ।** **५**

(१) आगत्य। (२) दिवाकरम्। (३) भवदीय:।
(४) नरपति:। (५) वृषस्कन्ध:। (६) संभ्रान्त: ।

**प्र.५. 'विद्वस्' (पुलिङ्गे) अथवा 'अदस् (स्त्रीलिङ्गे)' शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत।** **५**

**प्र.६. अधोलिखितेषु पञ्चानां शब्दानामर्थं विलिख्य तेषां प्रत्ययान् निर्दिशत ।** **५**

(१) पठितुम्। (२) गार्ग्य:। (३) पौराणिक:। (४) धनिक: (५) मोदमान:। (६) आकर्णित:।

**प्र.७. अधोलिखितेषु पञ्चानां पदानां सन्धिविच्छेदं कुरुत ।** **५**

(१) कलाश्च। (२) बहिरेव। (३) वाक्यमब्रवीत्।
(४) तस्यानुरूपी। (५) अद्यापि। (६) तस्योत्तमा।

**प्र.८. अधोलिखितवाक्येषु पञ्चानां संस्कृतभाषायामनुवादं कुरुत ।** **५**

(१) वह अग्नि से भोजन पकाता है। (२) राम का जन्म किस कुल में हुआ? (३) माता के गोद में बच्चा खेलता है। (४) पृथ्वी पर पुण्यात्मा कौन है? (५) ग्रामीण लोग स्वस्थ एवं पुष्ट होते हैं। (६) आम किन दिनों में होते हैं?

(1) He cooks food over a fire. (2) In which family Rama was born. (3) The child plays on the lap of the mother. (4) Who is the virtuous soul on earth?(5) The villagers are healthy and strong. (6) On which days are mangoes available?

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

## संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

### तृतीयं प्रश्नपत्रम् - Third Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु द्वयोः स्वोत्तरभाषया परिचयो देयः ।** **१०**

(१) आदि-ग्रन्थाः। (२) पुराणानि । (३) महाभारतम् ।

**प्र.२. निम्नलिखितासु पञ्चानां सूक्तीनामर्थं स्वोत्तरभाषया लिखत ।** **५**

(१) दुर्जयाः हि विषयाः विदुषापि। (२) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

(३) दोषवर्जितानि कार्याणि दुर्लभानि। (४) धैर्यं कटु भवेत् , किन्तु तस्यास्ति मधुरं फलम्।

(५) दुसङ्गादेकाकी वरम्। (६) झटिति पराशयवेदिनो हि विज्ञाः।

**प्र.३. अधोलिखितेषु केषाञ्चित् पञ्चानां वाक्यानां शुद्धिः विधेया ।** **५**

(१) <u>सुहृदयस्य</u> पत्रं पठामि। (२) अहं <u>पश्यति</u>। (३) सः <u>भोजनः</u> करोति।

(४) मया <u>नृत्यती</u> बाला दृष्टा। (५) <u>इमं</u> पुस्तकम् अस्ति। (६) अहं <u>मित्रस्य सह</u> गच्छामि।

**प्र.४. अधस्तनस्य गद्यखण्डस्य स्वभाषया अर्थं लिखत।** **५**

हिमालयात् पतितपावनी भागीरथी,यमपुत्री,सिन्धुः ब्रह्मपुत्रादयो नद्यः प्रभवन्ति। स्व-स्व निर्मलवारिभिः जनानां कल्मषम् अपघ्नन्त्य एताः सरितः बहून् जनपदान् सस्यसमृद्धिसंपूर्णान् कुर्वन्ति। सरिद्भ्यः एताभ्यः कुल्याभिः पानीयं सुदुर-क्षेत्रेषु नीयते। येन वृष्टिं विनाऽपि लोकाः प्रभूतं धान्यम् उत्पादयति। ग्रीष्मर्तौ हिमवति स्थितं हिमं सूर्यतापेन द्रवति।

**प्र.५. परीक्षाशुल्क प्राप्तये पितरं प्रति पत्रं लिखत ।** **५**

**प्र.६. निम्नलिखितेषु पञ्चानां छन्दसां लक्षणमुदाहरणञ्च लिखत।** **१०**

(१) उपजातिः। (२) उपेन्द्रवज्रा। (३) रथोद्धता । (४) तोटकम् ।

(५) वसन्ततिलकम्। (६) शिखरिणी।

**प्र.७. एकमाश्रित्य संस्कृतभाषया निबन्धं लिखत ।** **१०**

(१) कृषकः। (२) भारतवर्षः। (३) संस्कृतभाषा ।

❑ ❑ ❑